Ex/Sans/PG/3.3E/75/2017

# MASTER OF ARTS EXAMINATION, 2017

(2nd Year, 3rd Semester)

## SANSKRIT

### Course : XIII E

### [A General Survey of Indian Epigraphy]

Time : Two Hours Full Marks : 30

*The figures in the margin indicate full marks.*

### क – विभागः

१। सुरगिरा देवनागर्या लिप्या **त्रयः** प्रश्नाः समाधेयाः। 1×3=3

(क) प्राचीन(Early)ब्राह्म्याः पाठोद्धारविषये आदितमः प्रयत्नः कः ज्ञायते ?

(ख) आदौ खरोष्ठी लिपिः कैः नामभिः उल्लिख्यते स्म ?

(ग) अभिलेखेषु जिह्वामूलीयोपध्मानीयौ कस्मिन् कालावसरे आविर्भूतौ ?

(घ) ब्राह्मीलिपेः द्राविडोद्भवं ये प्रस्तुवन्ति तेषु द्वौ विद्वांसौ उल्लेखनीयौ।

(ङ) अशोकाभिलेखे उपलब्धस्य इ–वर्णस्य ए–वर्णस्य च रूपद्वयं वाक्यमात्रेण वर्ण्यताम्।

२। अधोलिखितेषु **त्रयः** प्रश्नाः समाधेयाः। तेषु **अन्यतमः** सुरगिरा देवनागर्या लिप्या लेखनीयः। 4×3=12

(क) अशोकाभिलेखेषु उपलब्धायाः ब्राह्मीलिपेः वैशिष्ट्यानि सोदाहरणं वर्ण्यन्ताम्।

[*Turn over*]

(ख) ग-ड-त-वर्णानां प्राचीनब्राह्म्या आरभ्य गौडीं यावत् विवर्तनं सचित्रं प्रदर्श्यताम्।

(ग) ब्राह्म्या लिपेः उद्भवमाश्रित्य ये प्रस्तावाः प्रचलन्ति तेषु कस्तावत् अद्यापि ग्रहणीयतमत्वेन सं भाव्यते? तस्य व्याख्या कार्या। 1+3

(घ) Bühler-महोदयैः भारतवर्षे आरामीय-वर्णमालायाः प्रचलनं काभिः युक्तिभिः समर्थ्यते?

(ङ) ''गुप्तब्राह्मीलिपेः'' क्षेत्रीयप्रभेदविषये पूर्वतनानां लिपितात्त्विकानां मतानि समासतः समुप स्थाप्यन्ताम्।

**ख - विभागः**

३। सुरगिरा देवनागर्या लिप्या **त्रयः** प्रश्नाः समाधेयाः। 1×3=3

(क) अशोकाभिलेखानां जुनागढसंस्करणे कस्याः प्राकृतभाषाया उपयोगो दृश्यते?

(ख) भिक्षोः इति पदम् EHS इति भाषायां कीदृशं रूपं गृह्णाति?

(ग) एतावल्लब्धेषु अभिलेखेषु संस्कृतभाषाया आदितम उपयोगः कुत्र प्राप्यते?

(घ) ख-खण्ड-लकार-शब्दैः कासां संख्यानां बोधो भवति?

(ङ) मिहिरकुलस्य ग्वालिअर्-प्रस्तरलेखस्य कविः कः?

४। ङ-चिह्नितः प्रश्नोऽवश्यमेव समाधेयः। अन्येषु **द्वितयं** समाधेयम् ; **तयोरेकतरस्य** उत्तरं संस्कृतेन देवनागर्या च लेखनीयम्। 4×3=12

(क) अधोलिखितं सन्दर्भं सावधानं पठित्वा तत्र अशोकप्राकृतस्य को भेद उपयुक्त इति सयुक्तिकं वि चार्यताम्।

लजूका मे बहूसु पानसतसहसेसु जनसि आयता। तेसं ये अभिहाले वा दंडे वा अतपतिये मे कटे। ..... सुखीयनदुखीयनं जानिसंति ..... नातिका व कानि निझपयिसंति जीविताये ..... निलुधसि पि कालसि पालतं आलाधयेवू ति।

(संस्कृतच्छाया-रज्जुका मया बहुषु प्राणशतसहस्रेषु जने (=जनेषु)आयता:। तेषां य: अभिहार: वा दण्ड: वा आत्मपतिक: मया कृत:। ..... सुखनदुखनं ज्ञास्यन्ति .... ज्ञातिका: वा कां (श्चित्) निध्याययिष्यन्ति जीविताय..... निरुद्धे अपि काले पारत्रिकम् आ राधयेयु: इति।)

(ख) प्रथमरुद्रदाम्नो जुनागढप्रशस्ते: वस्तु काव्यगुणाश्च आ लोच्यन्ताम्।

(ग) शकाब्दमाश्रित्य संक्षिप्तो निबन्धो विरचनीय:।

(घ) अभिलेखसाहित्यस्य माहात्म्यं सदृष्टान्तं वि चार्यताम्।

(ङ) अधोलिखितानां संकेतानाम् देवनागर्या अङ्केन परिणमनं कार्यम्।

- वसुवेदर्तुशुभ्रांशु ....
- श्रुतिविपक्षभूधरधरा ...
- यमवाणाश्वचन्द्रे ....
- भुजगुणगगनकु ...।
- पक्षरामाम्बरशशि ...
- सिन्ध्वनलारिवसुन्धरा ...
- मुन्यृष्यृत्विन्दु ...
- षट्तुण्डतुण्डानलमुनिमही ... ।